# Shri Akhandanandadashakam

# શ્રીઅખણ્ડાનન્દદશકમ્

## Document Information

Text title : Shri Akhandanandadashakam

File name : akhaNDAnandadashakam.itx

Category : deities_misc, gurudev, rAmakRiShNa, dashaka

Location : doc_deities_misc

Author : Swami Bhavaghanananda

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

## Shri Akhandanandadashakam

# શ્રીઅખણ્ડાનન્દદશકમ્

રામકૃષ્ણગતપ્રાણમખણ્ડાનન્દનામકમ્ ।
નમામિ સ્વામિપાદં તં શુદ્ધસત્ત્વસમન્વિતમ્ ॥ ૧॥

સદ્બ્રાહ્મણકુલોદ્ભૂતં નાનાગુણવિભૂષિતમ્ ।
વન્દે ગઙ્ગાધરં ચાહં બાલ્યાદેવ વિવેકિનમ્ ॥ ૨॥

અવતારવરિષ્ઠેન કૃપા યસ્મિન્ સ્વતઃ કૃતા ।
નમસ્તસ્મૈ કૃતાર્થાય નૈષ્ઠિકબ્રહ્મચારિણે ॥ ૩॥

વિષયવીતરાગાય સંસારત્યાગિને તથા ।
નમો માયાવિમુક્તાય સંન્યાસવ્રતધારિણે ॥ ૪॥

સાહસેનામિતેનૈવ તીર્થભ્રમેણ તત્પરમ્ ।
પરિવ્રાજમહં વન્દે યુવાનમકુતોભયમ્ ॥ ૫॥

ભ્રમણદતિ વિજ્ઞં ચ દીન-દુઃખેન કાતરમ્ ।
નમામિ જીવસેવાર્થૈ સર્વાર્થાર્પિતજીવનમ્ ॥ ૬॥

દુર્ભિક્ષ પીડ઼ૈતાનાં તુ બહુધા પ્રાણરક્ષકમ્ ।
નમામિ નિત્યં શિરસા અનાથબાલસેવિનમ્ ॥ ૭॥

જીવેષુ શિવબુદ્ધિશ્ચાપ્યાસીદ્ યસ્ય સ્વભાવતઃ ।
તસ્ય પાદદ્વયં ચાપિ વન્દે નિત્યં વિશેષતઃ ॥ ૮॥

બહૂનામાશ્રિતાનાં તુ ભવવ્યાધિવિનાશકમ્ ।
નમામિ સઙ્ઘાચાર્યં તં સર્વેષાં ચ હિતૈષિણમ્ ॥ ૯॥

પરિણામિવયસ્યેવ ત્યક્તપૂતકલેવરમ્ ।
નૌમિ ગઙ્ગાધરં ચૈવ રામકૃષ્ણે સમાહિતમ્ ॥ ૧૦॥

ઇતિ સ્વામિભાવઘનાનન્દવિરચિતં “શ્રીમદખણ્ડાનન્દદશકમ્” સમ્પૂર્ણમ્ ।

પ્રણામમન્ત્રઃ-

અખણ્ડાનન્દસિન્ધૌ યઃ સતતં વૈ મીનાયતે ।
કર્મયોગાતિનિષ્ઠાયાયાખણ્ડાનન્દાય તે નમઃ ॥

Proofread by Aruna Narayanan

*Shri Akhandanandadashakam*
pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*